# ॥ वाल्मीकि रामायण॥

## २ अयोध्याकाण्ड

### अध्याय ४३

रामोऽपि रात्रिशेषेण तेनैव महदन्तरम् ।
जगाम पुरुषव्याघ्रः पितुराज्ञाम् अनुस्मरन् ॥१॥

तथैव गच्छतस्तस्य व्यपायाद्रजनी शिवा ।
उपास्य स शिवां सन्ध्यां विषयान्तं व्यगाहत ॥२॥

ग्रामान्विकृष्टसीमांस्तान्पुष्पितानि वनानि च ।
पश्यन्नतिययौ शीघ्रं शरैरिव हयोत्तमैः ॥३॥

शृण्वन्वाचो मनुष्याणां ग्रामसंवासवासिनाम् ।
राजानं धिग्दशरथं कामस्य वशमागतम् ॥४॥

हा नृशंसाद्य कैकेयी पापा पापानुबन्धिनी ।
तीक्ष्णा सम्भिन्नमर्यादा तीक्ष्णे कर्मणि वर्तते ॥५॥

या पुत्रमीदृशं राज्ञः प्रवासयति धार्मिकम् ।
वन वासे महाप्राज्ञं सानुक्रोशमतन्द्रितम् ॥६॥

एता वाचो मनुष्याणां ग्रामसंवासवासिनाम् ।
शृण्वन्नतिययौ वीरः कोसलान्कोसलेश्वरः ॥७॥

ततो वेदश्रुतिं नाम शिववारिवहां नदीम् ।
उत्तीर्याभिमुखः प्रायादगस्त्याध्युषितां दिशम् ॥८॥

गत्वा तु सुचिरं कालं ततः शीतजलां नदीम् ।
गोमतीं गोयुतानूपामतरत्सागरङ्गमाम् ॥९॥

गोमतीं चाप्यतिक्रम्य राघवः शीघ्रगैर्हयैः ।
मयूरहंसाभिरुतां ततार स्यन्दिकां नदीम् ॥१०॥

स महीं मनुना राज्ञा दत्तामिक्ष्वाकवे पुरा ।
स्फीतां राष्ट्रावृतां रामो वैदेहीमन्वदर्शयत् ॥११॥

सूत इत्येव चाभाष्य सारथिं तमभीक्ष्णशः ।
हंसमत्तस्वरः श्रीमानुवाच पुरुषर्षभः ॥१२॥

कदाहं पुनरागम्य सरय्वाः पुष्पिते वने ।
मृगयां पर्याटष्यामि मात्रा पित्रा च सङ्गतः ॥१३॥

नात्यर्थमभिकाङ्क्षामि मृगयां सरयूवने ।
रतिर्ह्येषातुला लोके राजर्षिगणसंमता ॥१४॥

स तमध्वानमैक्ष्वाकः सूतं मधुरया गिरा ।
तं तमर्थमभिप्रेत्य ययौवाक्यमुदीरयन् ॥१५॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com